कौष्टस्पर्शो यथा न भवतीति तात्पर्य्यम् । तथाच वशिष्ठः । "आचान्तः पुनराचामेत् वासोविपरिधाय च । ओष्ठौ संस्पृश्य च तथा यत्र स्यातामलोमकौ"। एवञ्च प्रागुक्तहारीतवचने यत् ओष्ठयोर्मार्जनमुक्तं तत्सलोमकयोरेवेति । एतदनन्तरं वामहस्तं पादौ शिरश्च दक्षिणेन पाणिना जलेनाभ्युक्षयेत् । तथाच कामधेनावापस्तम्बः । "त्रिराचामेत् हृद्गताभिरद्भिस्त्रिरोष्ठौ परिमृजेत् । द्विरित्येके दक्षिणेन पाणिना सव्यं प्रोक्ष्य पादौ शिरश्च" । गोभिलः । 'त्रिराचामेत् द्विः प्रमृजीत पादावभ्युक्ष्य शिरोऽभ्युक्षयेत् इन्द्रियाण्यद्भिः स्पृशेत् अक्षिणी नासिके कर्णाविति" । इन्द्रियाणि इन्द्रियायतनानि इन्द्रियाणाममूर्त्तत्वात् तिसृभिरिति तर्ज्जनीमध्यमानामिकाभिः 'तर्ज्जन्यनामामध्याभिर्मुखं पूर्वं स्पृशेदिति ब्रह्मचारिकाण्डष्टतभविष्यात् ।'घ्राणं नासापुटद्वयं "तर्ज्जन्यङ्गुष्ठयोगेन स्पृशेन्नासापुटद्वम्"इति शङ्खात् । एवं पुनःपुनरिति चक्षुःश्रोत्रद्वयाभिप्रायेण श्रीदत्तोऽप्येवम् । तेन दक्षिणं स्पृष्ट्वा वामं स्पृशेत् । व्यक्तं कामधेनावाचारचिन्तामणावापस्तम्बः । 'चक्षुषी नासिके कर्णौ सकृत् सकृदुपस्पृशेत्" । द्विरित्येके द्विरिति शाख्यन्तरीयम् अत्र गोभिलीयापस्तम्बीयपाठक्रमो न ग्राह्यः तत्क्रमस्य "श्रुत्यर्थपठनस्थानमुख्यप्रावर्त्तिकाः' इति जैमिनिसूत्रात् 'प्राणं पश्चादनन्तरमिति" दक्षोक्तशब्दक्रमेण बलवता बाधात् । अतएव दक्षेणैव प्रतिज्ञातम् । "उक्तं कर्म्म क्रमो नोक्तः न कालस्तत एव हि । द्विजानान्तु हितार्थाय दक्षस्तु स्वयमब्रवीत्"। अतश्छन्दोगपरिशिष्टेन गोभिलास्पष्टक्रमः स्पष्टीकृतः । यथा 'त्रिःप्राश्यापोद्विरुन्मृज्य मुखमेतान्युपस्पृशेत् । आस्यनासाक्षिकर्णांश्च नाभिवक्षःशिरोऽंसकान्' । अत्र नासाक्षीत्युक्तम् । सर्वत्राङ्गुष्ठयोगेन करणमाह पैठीनसिः । "अग्निरङ्गुष्ठस्तस्मात्तेनैव सर्व्वाणि स्थानानि स्पृशेत्"। नाभिस्पर्शानन्तरं जलस्पर्शमाह व्यासः । 'ततः स्पृशन्नाभिदेशं पुनरपश्च संस्पृशेत्' । इन्द्रियस्पर्शानन्तरं भविष्ये । "यद्भूमावुदकं वीर ! समुत्सृजति मानवः । वासुकिप्रमुखान् नागान् तेन प्रीणाति मानवः' । पैठीनसिः । "स्पृष्ट्वा प्राणान् यथासंख्यं पादौ प्रोह्य पयः शुचिः । सव्ये पाणौ ततः शेषा अपोविनिनयेदिति" प्राणान् इन्द्रियाणीति रत्नाकरः । शेषा आचमनावशिष्टाः इति मदनपारिजातः । एतत्परमेव 'अन्ततः प्रत्युपस्पृश्य शुचिः' इति गोभिलसूत्रम् । अक्ष्यादिस्पर्शसहितमाचमनं कृत्वा उदकं स्पृष्ट्वा शुचिरिति

सरला । अन्तत उपस्पृशनात् पाणिना उदकस्पर्शं कृत्वा शुचिर्भवतीति भट्टभाष्यम् । अतएवोपस्पर्शमभिधाय ततो जलशेषं वामहस्ते त्यजेदिति पितृदयिता । एतेन द्विजातीनामपि द्विराचमने ओष्ठजलस्पर्शमात्रं शास्त्रार्थः "प्रत्युपस्पृश्यान्ततः शुचिर्भवति" इति गोभिलगृह्यादिति छन्दोगाह्निकं निरस्तम् । "हृदयं स्पृशंस्त्वेवमेवाचामेत्" इति तदनन्तरसूत्रेण हृदयस्पृग्जलनियमात् । "उच्छिष्टोऽत्रैवातोऽन्यथा भवत" इति सूत्रान्तरेण हृद्गतत्वाभावे "उच्छिष्टत्वाभिधानात् एतदनन्तरमेवाथ प्रत्युपस्पर्शनम्" इत्यादिना द्विराचमनादिविधानाच्च । वायुपुराणे । 'निष्ठीवने तथाभ्यङ्गे तथा पादावसेचने । उच्छिष्टस्य च संभाषात् अशुच्युपहतस्य च । सन्देहेषु च सर्वेषु शिखां मुक्त्वा तथैव च । विना यज्ञोपवीतेन नित्यमेवमुपस्पृशेत् । उष्ट्रवायससंस्पर्शे दर्शने चान्त्यवासिनाम्" । प्रागर्द्धं कृत इति शेषः । सन्देहेषु अप्रायत्यस्येति शेषः । शिखां मुक्त्वा अनन्तरं बद्ध्वा यज्ञोपवीतेन विना स्थित्वा पुनः परिधाय चाचामेदित्यर्थः । हारीतः । "स्त्रीशूद्रोच्छिष्टसंभाषणे मूत्रपुरीषोत्सर्गदर्शने देवमभिगन्तुकाम आचामेदिति" । देवलः । "उच्छिष्टं मानवं स्पृष्ट्वा भोज्यं चापि तथाविधम् । तथैव हस्तौ पादौ च प्रक्षाल्याचम्य शुद्ध्यति" । तथाविधमुच्छिष्टम् । याज्ञवल्क्यः । "स्नात्वा पीत्वा क्षुते सुप्ते भुक्त्वा रथ्योपसर्पणे । आचान्तः पुनराचामेत् वासोविपर्परिधाय च" । ब्रह्मपुराणम् "होमे भोजनकाले च सन्ध्ययोरुभयोरपि । आचान्तः पुनराचामेत् अन्यत्रापि सकृत् सकृत् । द्विराचम्य ततः शुद्धः स्मृत्वा विष्णुं सनातनम्" स्मृतिः । "क्षुते निष्ठीविते सुप्ते परिधानेऽश्रुपातने । कर्म्मस्थ एषु नाचामेद्दक्षिणं श्रवणं स्पृशेत्" । साङ्ख्यायनः । "आदित्यावसवोरुद्रा वायुरग्निश्च धर्म्मराट् । विप्रस्य दक्षिणे कर्णे नित्यं तिष्ठन्ति देवताः" । अत्र हेतुमाह पराशरः । "प्रभासादीनि तीर्थानि गङ्गाद्याः सरितस्तथा । विप्रस्य दक्षिणे कर्णे वसन्ति मनुरब्रवीत्" । मार्कण्डेयपुराणम् । "कुर्य्यादाचमनं स्पर्शं गोपृष्ठस्यार्कदर्शनम् । कुर्व्वीतालभनञ्चापि दक्षिणश्रवणस्य च । यथाविभवतोह्येतत् पूर्व्वाभावे ततः परम् । न पूर्व्वस्मिन् विद्यमाने उत्तरप्राप्तिरिष्यते" । पुराणसारवायुपुराणयोः । "यः कर्म कुरुते मोहादनाचम्यैव नास्तिकः । भवन्ति हि वृथा तस्य क्रियाः सर्व्वा न संशयः" । इत्यन्तम् ।